गेहस्थिता कन्या। द्वितीयवयाः स्त्री। सा च युवती। इति भरतधृतरुद्रः हेमचन्द्रश्च॥

चिरतिक्तः, पुं, ( चिरं चिरात् वा चिरावधीत्यर्थः तिक्तः।) वृक्षविशेषः। चिरता इति भाषा॥ तत्पर्य्यायः। चिरातिक्तः २ तिक्तकः ३ अनार्य्यतिक्तकः ४ किराततिक्तः ५ भूनिम्बः ६ कैरातकः ७ सुतिक्तकः ८। इति शब्दरत्नावली॥ (भूनिम्बशब्देऽस्य विवरणं ज्ञातव्यम्॥)

चिरत्नः, त्रि, ( चिर+"चिरपरुत्परारिभ्यस्त्नो वक्तव्यः।" ४।३।२३। सूत्रस्य वार्त्तिकोक्त्या त्नप्रत्ययः।) पुरातनः। चिरकालोत्पन्नः। इति जटाधरः॥

चिरन्तनः, त्रि, ( चिरं भवं इति। "सायंचिरमिति।"४।३।२३। इति ट्युल् तुट् च। निपातनात् साधुः।) पुरातनः। इत्यमरः।३।१।७७॥ (यथा, पञ्चतन्त्रे।१।८०। "अयमस्माकं चिरन्तनो मन्त्रिपुत्त्रो दमनकोऽव्याहतप्रवेशः।")

पुं, मुनिविशेषः। यथा, सिद्धान्तकौमुद्याम्।४।३।१०५। इत्यस्य वार्त्तिके। "ब्राह्मणेषु पुराणेन चिरन्तनेन मुनिना।")

चिरपाकी, [न्] पुं, ( चिरेण पाकोऽस्यास्य। पाक+इनिः।) कपित्थः। इति राजनिर्घण्टः॥

चिरपुष्पः, पुं, ( चिराणि पुष्पाणि यस्य।) वकुलवृक्षः। इति राजनिर्घण्टः॥

चिरम्, व्य, ( चि+रमक्।) चिरार्थम्। दीर्घकालार्थम्। तत्पर्य्यायः। चिराय २ चिररात्राय ३ चिरस्य ४ चिरात् ५ चिरेण ६। इति हेमचन्द्रः।३।१६८। (यथा, रघौ।३।६२।

"तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः॥")

चिरमेही, [न्] पुं, स्त्री, (चिरेण मेहतीति। मिह+णिनिः।) गर्द्दभः। इति हेमचन्द्रः।४।३२२॥

चिरम्भणः, पुं, ( चिरं भणति क्रोशतीति। चिरं+भण+अच्।) चिल्लः। इति त्रिकाण्डशेषः॥

चिररात्रं, क्ली, (चिरा रात्रिरिति योगविभागात् अच् समासे।) दीर्घकालः। इति हलायुधः॥ ( यथा, महाभारते।१।१६८।३।
"चिररात्रोषितास्ते ब्राह्मणस्य निवेशने॥")

चिररात्राय, व्य, (चिररात्रं अयते इति। अय+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) दीर्घकालः। इत्यमरः।३।४।१४॥ ( यथा, मनुः।३।२६६।
"हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते।
पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः॥")

चिरविल्वः, पुं, ( चिरं विलति आच्छादयति पत्रकण्टकादिभिरिति। विल आच्छादने+वः।) करञ्जवृक्षः। इत्यमरः।२।४।४७॥ ( यथा,—
"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतगृध्रकङ्कानां पुरीषाणि च दारुणम्॥"
इति सुश्रुते सूत्रस्थाने षट्त्रिंशेऽध्याये॥)

चिरसूता, स्त्री, ( चिरं सूता या सा।) चिरप्रसूता गवी। केडेन् गाद इति भाषा। तत्पर्य्यायः। बष्कयणी २। इत्यमरः।२।९।७१॥

चिरस्थायी, [न्] त्रि, (चिरं तिष्ठतीति। स्था+णिनिः।) बहुकालस्थाता॥

चिरस्य, व्य, ( चिरमस्यते इति। अस्+यत्। शकन्ध्वादित्वात् साधुः।) दीर्घकालः। इत्यमरः।३।३।१॥ (यथा, हरिवंशे।१२६।२३।
"चिरस्य खलु कालेन संस्तुतोऽसि महात्मना।")

चिराटिका, स्त्री, ( चिरं अटतीति। अट+ण्वुल् कापि अत इत्वञ्च।) श्वेतपुनर्नवा। इति रत्नमाला॥ माताड़ी इति भाषा॥ यथा, वैद्यके।
"गोमूत्रयुक्तस्य पुरातनस्य
यष्ट्याह्वसंज्ञानि चिराटिकायाः।"

चिरात्, व्य, ( चिरं अततीति। अत्+क्विप्) दीर्घकालः। इति हेमचन्द्रः।६।१६८॥ (यथा, पञ्चतन्त्रे।४।७८। "भो भगिनीसुत! किमितिचिराद्दृष्टोऽसि॥")

चिरात्, पुं, (चिरं चिरेण वा अत्ति। अद्+क्विप्।) गरुड़ः। इति त्रिकाण्डशेषः॥

चिरातिक्तः, पुं, (चिरं अतितिक्तः।) चिरतिक्तः। इति शब्दरत्नावली॥

चिराय, व्य, ( चिरं अयते। अय+अण्।) दीर्घकालः। इति हेमचन्द्रः।६।१६८। (यथा, महाभारते।१३।६४।१०।
"पुरा धर्म्मो वर्त्तते नेह यावत्
तावद्गच्छाम सुरलोकं चिराय॥")

चिरायुः, [स्] पुं, ( चिरमायुर्यस्य।) देवता। इति त्रिकाण्डशेषः॥ चिरजीविनि त्रि। यथा,
"भवति यदि मनुष्यो गुर्व्वधीनश्चिरायुः॥"
इत्यागमः॥
( यथा च पञ्चतन्त्रे।५।३४।
"यदि विस्तारविस्तीर्णं तद्भवेत् चिरायुषम्॥")

चिरि, र न हिंसे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) रेफोपधः। र वैदिकः। न, चिरिणोति। इति दुर्गादासः॥

चिरिः, पुं, ( चिनोति मनुष्यवद्वाक्यादिकम्। चि+रिक्।) शुकपक्षी। इति त्रिकाण्डशेषः॥

चिरिण्टी, स्त्री, ( चिरण्टी+पृषोदरात् साधुः।) ऊढ़ा अनूढ़ा वा पितृगेहस्थिता कन्या। तत्पर्य्यायः। स्ववासिनी। इत्यमरः।२।६।९॥ चिरण्टी ३ सुवासिनी ४। इति भरतः॥ द्वितीयवयाः स्त्री। युवती। इति मेदिनी॥

चिरिविल्वः, पुं, ( चिरविल्वः। पृषोदरादित्वात् साधुः।) चिरविल्वः। करञ्जवृक्षः। इत्यमरटीकायां भरतः॥

चिरु, स्त्री, ( चिञ् चयने+क्विप्। चि चयनं यद्बाहुमित्यर्थः रातीति। रा+ब्रात्ययादयश्चेति कुः। बाहुसन्धिबलमाश्रित्यैव यद्बाहुक्रियासम्भवात् तथात्वम्।) बाहुसन्धिः। इति शब्दचन्द्रिका॥

चिरे, व्य, चिरम्। इत्यमरटीकायां रायमुकुटः॥

चिरेण, व्य, चिरम्। इति हेमचन्द्रः॥ ( यथा, रघुः।५।६४।

"भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव॥")

चिर्भटी, स्त्री, ( चिरेण भटतीति। भट+अच्। गौरादित्वात् ङीष्। पृषोदरादित्वात् साधुः।) कर्कटी। इति हेमचन्द्रः।४।२५५॥ ( यथा, पञ्चतन्त्रे।१।१६७।"अहो अविवेकोऽस्मत्पतेः पुरीषोत्सर्गमाचरंश्चिर्भटीभक्षणं करोति॥")

चिर्भिटा, स्त्री, कर्कटीभेदः। चिभिड़ा इति वेलसेंद इति च देशान्तरीयभाषा॥ तत्पर्य्यायः। सुचित्रा २ चित्रफला ३ क्षेत्रचिर्भिटा ४ पाण्डुफला ५ पथ्या ६ रोचनफला ७ चिर्भिटिका ८ कर्कचिर्भिटा ९। इति राजनिर्घण्टः॥ चिर्भिटम् १० धेनुदुग्धम् ११ गोरक्षकर्कटी १२। अस्या गुणाः। मधुरत्वम्। रूक्षत्वम्। गुरुत्वम्। पित्तकफापहत्वम्। अनुष्णत्वम्। ग्राहित्वम्। विष्टम्भित्वञ्च। पक्वाया अस्या गुणाः। उष्णत्वम्। पित्तलत्वञ्च। इति भावप्रकाशः॥ गौल्यत्वम्। दीपनत्वञ्च॥ बालाया अस्या गुणाः। तिक्तत्वम्। किञ्चिदम्लत्वञ्च। शुष्कायाश्चास्या गुणाः। श्लेष्मवातारुचिजाड्यनाशित्वम्। रोचनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते॥)

चिल, श वासे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) वासः परिधानम्। श, चिलति वस्त्रं लोकः परिदधातीत्यर्थः। चेलिता। इति दुर्गादासः॥

चिलमीलिका, स्त्री, ( चिरं मीलतीति। मील्द् सङ्कोचे+ण्वुल्। ततष्टापि अत इत्वम्। रस्य लत्वे साधुः।) कण्ठीभेदः। खद्योतः। विद्युत्। इति मेदिनी। के, २२८॥

चिलिचिमः, पुं, (चिरिं हिंसां चिनोतीति। चिरि+चि+मक्। रस्य लत्वम्।) मत्स्यविशेषः। चालियागड़क इति ख्यातः। इत्याक इत्यके। इति भरतः॥ तत्पर्य्यायः। नलमीनः २। इत्यमरः।१।१०।१८॥ नलमीनः ३ चिलीचिमिः ४ चिलीचिमः ५ चिलिचीमः ६ चेलिचीमः ७ चिलीमः ८ चिलिमीनकः ९ चिलिचीमिः १० कवलः ११ चिलोटकः १२। इति भरतधृतकोषान्तरम्॥ चैङ्गो इति ख्यातो मत्स्यः। तस्य गुणाः। लघुत्वम्। रूक्षत्वम्। अनभिष्यन्दित्वम्। वायुकारित्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥

चिल्ल, शैथिल्ये। हावकृतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ह्रस्वी लघ्वान्तः। चिल्लति शैथिल्यकृते। इति दुर्गादासः॥

चिल्लः, पुं, ( चिल्लति हावभावेन उड्डीयते इति। चिल्ल+अच्।) पक्षिविशेषः। चिल् इति भाषा॥ तत्पर्य्यायः। आतायी २। इत्यमरः।२।५।२१॥ शकुनिः ३ आतापी ४। इति हेमचन्द्रः॥ खभ्रान्तिः ५ कण्ठनीडकः चिरम्भणः ७। इति त्रिकाण्डशेषः॥ ( यथा, विष्णुधर्म्मोत्तरे।